# संस्कृत वार्ता:

दिनाङ्क : 15/08/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- कृत्स्ने हि देशे अशीतितमस्य स्वतन्त्रता-दिवसस्य महोल्लासेन आचरणम् , रक्तदुर्गे प्रधानमन्त्रिणा विहितं राष्ट्रध्वजारोहणम् ।
- रक्तदुर्गे पप्रथमतया जातं वन्दे मातरम् इति राष्ट्रिय-गीतस्य सस्वर-गानम् ।
- प्रधानमन्त्रिणा निर्धन-मध्यमवर्गीय-कुटुम्बानां कृते निःशुल्क-प्रातिभासिक-प्रशिक्षणम् अथ च आगामि-वर्षे कोट्यधिक-युवभ्यः एआई-कौशल-प्रदानस्य कृता उद्घोषणा ।
- भारतं बहुभिः देशैस्सह सन्धिं विधाय महत्वपूर्ण-खनिज-क्षेत्रे
- विश्वासयुक्त-वैश्विक-सहयोगित्वेन समुदेतीति प्रधानमन्त्रिणा प्रतिपादितम्।
- संसाधनानाम् अस्त्रीकरणे प्रधानमन्त्रिणा प्रकटिता चिन्ता । समाह्वानानां निवारणे भारतस्य आत्मनिर्भरतायाः सामर्थ्यं अमुना प्रशंसितम् ।
- इण्डोनेशिया-देशे अद्य फ्लोर्स-इति तटस्य समीपे सप्त दशांशोत्तर सप्त तीव्रतायां भूकम्पेन मृतानां सङ्ख्या अष्टत्रिंशत् यावत् वर्धिता।

---------------------------------------

<u>स्वतन्त्रता-दिवसः</u>

देशः अद्य स्वकीयम् अशीतितमं स्वतन्त्रता-दिवसम् समाचरति। प्रधानमन्त्री नरेन्द्रमोदी दिल्ल्याः ऐतिहासिक-स्थलात् लाल किला इत्यस्मात् स्वतन्त्रता-दिवस-समारोहस्य नेतृत्वम् अकरोत्। तस्य आगमनावसरे प्रथमवारं लाल किला इत्यत्र वन्दे मातरम् इति राष्ट्रिय-गीतं प्रस्तुतम् । राष्ट्रध्वजारोहणावसरे एकविंशतिः-आग्नेयास्त्र-ध्वनिभिः अभिनन्दनम् अभवत् भारतीय-वायुसेनायाः द्वाभ्यां Mi-17 उदग्र-यानाभ्यां पुष्पवृष्टिश्च सञ्जाता। अस्य वर्षस्य एषः समारोहः युव-शक्त्यै समर्पितः । यच्च सप्तचत्वारिंशदधिक-द्विसहस्रतमं वर्षं यावत् विकसित-भारतस्य निर्माणे तरूण-भारतस्य योगदानम् आमानयति । रक्तदुर्गस्य प्राचीरात् राष्ट्रं सम्बोधयन् प्रधानमन्त्री मोदी रक्तदुर्गे वन्दे मातरम् इत्यस्य गानम् ऐतिहासिकः क्षणः इत्यवर्णयत्। सः अवदत् यत् राष्ट्रं महता उत्साहेन नव-सङ्कल्पैः च सह अग्रे सरति।

प्रधानमन्त्री मोदी न्यगादीत् यत् विगतेषु द्वादशवर्षेषु देशस्य कोटिशः नागरिकाः स्वकीयेन दृढ-सङ्कल्पेन समर्पणेन च राष्ट्रम् उन्नत-शिखरे प्रापयितुं सर्वविध-प्रयासान् कृतवन्तः। विविधेषु क्षेत्रेषु प्राप्ताः उपलब्धयः प्रकाशयन् सः अवदत् यत् द्वादशवर्षेषु रक्षोत्पादने प्रायः चतुर्गुणिता, खादी-ग्रामोद्योग-उत्पादने पञ्चगुणिता, इलैक्ट्रॉनिक-निर्माण-क्षेत्रे सप्तगुणिता आधुनिक-रेल-निर्माण-क्षेत्रे एकविंशति-गुणिता अथ च सञ्चार-दूरभाष-निर्माण-क्षेत्रे त्रयस्त्रिंशत्-गुणिता वृद्धिः सञ्जाता। सः असूचयत् यत् अन्तर्जाल-उपयोक्तॄणां संख्यायां चतुर्गुणिता अथ च अङ्कीय-वित्तीय-विनिमयेषु च शतगुणिता वृद्धिः अभवत्।

प्रधानमन्त्रिणा निर्धन-मध्यमवर्गीय-कुटुम्बानां कृते विविध-सार्वजनिक-परीक्षाभ्यः निःशुल्क-ऑनलाइन-प्रशिक्षणस्य घोषणम् अकारि। सः अवदत् यत् शीर्ष-अध्यापकानां निर्देशने उच्च-गुणवत्ता-युक्त-शिक्षां सर्वसुलभां विधातुम् एतत् एकं क्रान्तिकारि-पदक्षेपम् अस्ति, येन मध्यमवर्गीय-कुटुम्बानां सहस्रकोटि-रूप्यकाणां रक्षणं भविष्यति।

प्रधानमन्त्रिणा स्पष्टीकृतं यत् आगामि-एकस्मिन् वर्षे एककोटि-युवभ्यः कृत्रिम-बुद्धिमत्ता-कौशले प्रशिक्षणं प्रदास्यते, येन ते वैश्विक-एआई-क्षेत्रे नेतृत्वं कर्तुं समर्थाः भवेयुः। सः अवदत् यत् भारतेन व्ययः, गुणवत्ता, कौशलं चेत्येतेषु त्रिषु मुख्य-स्तम्भेषु विशेषावधानं दातव्यम् ।

प्रधानमन्त्री नरेन्द्रमोदी महत्वपूर्ण-खनिजेषु सर्वकारस्य विशेषावधानं प्रकाशयन् अवदत् यत् आधुनिक-प्रौद्योगिकी पूर्णतया महत्वपूर्ण-खनिजानाम् उपरि आश्रिता विद्यते , भारतं च अस्मिन् क्षेत्रे स्वस्थानं सुरक्षितुं सक्रियतया कार्यं करोति। सः असूचयत् यत् भारतेन राष्ट्रिय-महत्वपूर्ण-खनिजाभियानम् प्रारब्धम् अथ च महत्वपूर्ण-खनिज-वीथेश्च घोषणा कृता । प्रधानमन्त्रिणा प्रोदीरितं यत् बहुभिः देशैः सह सन्धयः क्रियन्ते, विश्वस्य च विश्वासः भारते निरन्तरं वर्धते। प्रधानमन्त्री मोदी अवदत् यत् सप्तचत्त्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् विकसित-भारतस्य लक्ष्यं प्राप्नुवन् भारतेन अनेकेषाम् अभूतपूर्व-संकटानां सम्मुखीकरणं कृतम्। कोविड्-वैश्विक-सङ्क्रमणस्य अथ तदनन्तरं यूक्रेन-पश्चिम-एशिया-क्षेत्रयोः सञ्जातानां संघर्षाणां वर्णनं सः अकरोत्। प्रधानमन्त्रिणा स्पष्टीकृतं यत् विश्वस्मिन् प्रत्येकं राष्ट्रं स्वकीय-हितानां रक्षणाय प्रयतते,

किन्तु दौर्भाग्येन अस्मिन् संकट-काले कैश्चिद्भिः देशैः स्व-प्रभुत्व-प्रदर्शनार्थं संसाधनानाम् अस्त्रीकरणस्य कुत्सितं षड्यन्त्रं कृतम्।

प्रधानमन्त्री सर्वेभ्यः दलेभ्यः सविनयं निवेदितवान् यत् ते संसदि राज्य-विधानसभासु च राजनैतिक-कलहं परित्यज्य महिला-आरक्षणस्य क्रियान्वयनाय सहयोगं कुर्युः ।

---------------------------------------

## प्रधानमन्त्री-गान्धी

प्रधानमन्त्री नरेन्द्रमोदी अद्य प्रातः राजघाट-समाधिस्थले महात्म-गान्धिने श्रद्धाञ्जलिं समर्पितवान्। एकस्मिन् सामाजिक-सञ्चार-पटले स्वविचारान् प्रकटयन् श्रीमोदी प्रतिपादितवान् यत् सर्वकारः सदैव महात्मगान्धिनः आदर्श-कार्येभ्यः प्रेरणां गृह्णाति। प्रधानमन्त्रिणा स्पष्टीकृतं यत् सर्वकारः प्रत्येकस्य नागरिकस्य प्रगतये, समुत्थानार्थं च सततं कार्यं विधास्यति, येन भारतम् उत्तरोत्तरं वर्धयेदिति।

---------------------------------------

## प्रधानमन्त्री-अरविन्दः

प्रधानमन्त्री नरेन्द्रमोदी अद्य अरविन्द-महोदयं तस्य जयन्त्यवसरे व्यस्मरत्। एकस्मिन् सामाजिक-सञ्चार-पटलीय-सन्देशे प्रधानमन्त्री अरविन्द-महोदयम् महान् दार्शनिकः, प्रखर-राष्ट्रवादी, कविः, चिन्तकश्च इत्यादिभिः उपाधिभिः वर्णितवान्। तेन प्रोक्तं यत् श्री-अरविन्दः स्वकीयम् सम्पूर्णं जीवनं भारतस्य स्वतन्त्रतायै अथ समग्र-मानवतायाः समुत्थानाय च व्यजुहोत्। प्रधानमन्त्रिणा उक्तं यत् विविध-विषयेषु तस्य विचाराः अद्यापि विश्वस्मिन् जनान् निरन्तरं प्रेरयन्ति।

---------------------------------------

## राष्ट्रपतिः

राष्ट्रपतिः द्रौपदीमुर्मुः अद्य अशीतितमे स्वातन्त्र्यदिने राष्ट्रिय-युद्धस्मारके वीरान् श्रद्धाञ्जलिम् अददात्। राष्ट्रपतिः स्मारके पुष्पमालां समर्पयित्वा हुतात्मवीरान् श्रद्धाञ्जलिम् अर्पितवती। रक्षामन्त्री राजनाथसिंहः, रक्षासचिवः सञ्जय सेठः, रक्षासचिवः जनरल एन्. एस्. राजा सुब्रमण्यम्, सेनाप्रमुखः जनरल धीरज् सेठः, नौसेनाध्यक्षः ऐडमिरल् कृष्णा स्वामिनाथन्, वायुसेना प्रमुखः एयर्-चीफ मार्शल् अमरप्रीत सिङ्घः, रक्षासचिवः राजेशकुमारसिङ्घः च अस्मिन् अवसरे उपस्थिताः आसन्।

---

**इण्डोनेशिया-भूकम्पः**

इण्डोनेशिया-देशे अद्य फ्लोर्स-इति तटस्य समीपे सप्त दशांशोत्तर सप्त तीव्रतायां भूकम्पेन मृतानां सङ्ख्या अष्टत्रिंशत् यावत् वर्धिता। प्रचण्डभूकम्पस्य अनन्तरं उद्धार-दलानि सर्वाधिक-प्रभावित-क्षेत्रेषु गन्तुं प्रयतन्ते। देशस्य अनेकेषु भागेषु एक-मीटर्-मितात् न्यून-परिमाणस्य सुनामी-तरङ्गानां सूचनापि प्राप्तास्ति। भूकम्पस्य प्रायः त्रिहोरानन्तरम् एव सुनामी-सूचना प्रत्याख्याता।

।। इति वार्ता: ।।